वटुकभैरवपद्धतिः



वटु
१

ॐ श्रीगुरवेशिवाय्यैंनमः श्रीगणेशायनमः
श्रीगुरुपादुकाभ्योनमः अथदक्षिणमार्गेण
वटुकपंचाङ्गंलिख्यते तत्रादौपटलंप्रारभ्यते
ॐ श्रीरस्तुमे श्रीः उड्डेह्वटुकंडे·न्तमापङ्कद्धार
णं तथा क्रुरुद्धयंप्रुनर्डे·न्तंवटुकंतंसमर्चयेत्
एकविंशात्यक्षराण्माशक्तिरुद्धोमनुःस्मृतः अ

भीष्टफलसंसिद्धौ कीर्तितः स्वरपादपः अस्य उद्धार
णः प्रोक्तो मुनिः पङ्क्तिस्तच्छन्दकम् देवता वटुकः
प्रोक्तो विनियोगस्तु साधने अङ्गुली देह वक्त्रेषु
मूर्तीर्न्यसेद्यथापुरा सद्यादिपंचवक्त्रस्वायमीशा
नादिषु संयजेत् षड्दीर्घयुक्तया शक्त्यावकार
ण चतद्भता अंगानि जातियुक्तानि प्रणवाद्यानि

प॰ व॰ २

कल्पयेत् तस्य ध्यानं त्रिधा प्रोक्तं सात्विकादिविभेद
तः। सत्त्वध्यानं ॐ वन्दे बालं स्फटिकसदृशं कुण्डलो
ल्लासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणी
नूपुराद्यैः दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्
सात्विकं ध्यानमाख्यातम ॥

पमृत्युनिवारणम् आयुरारोग्यजननमपूर्वं
फलप्रदम् वर्णलक्षं जपेन्मंत्री हविष्याशी जिते
न्द्रियः तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः
धर्माधर्मादिभिःक्लृप्तपीठे पङ्कजशोभिते प्रके
णान्तस्त्रिकोणस्थे व्योमपङ्कजसंयुते वह्निकंपू
जयेद्देवंमूर्तिंमूलेनकल्पयेत् सद्योजातेनमं

प॰ व॰ ३ त्रेणदेवमावाहयेत्ततः मूलादिवामदेवेनस्था
पयेत्परमेश्वरम् मूलमंत्रेणकर्त्तव्यंसान्निध्यं
तदनन्तरम् अघोरेणसुधीःकुर्यात्सन्निरोधम
3 नन्तरम् पुरुषाख्येनमन्त्रेनायोनिमुद्रांप्रदर्श
येत् देवायवन्दनंकुर्यादीशानेनसमाहितः
पतन्सर्वंविधानव्यंजनमुद्राभिरादरात् व्योम

पद्मदलेष्वर्चयेदेसितांगादिभैरवान् असितांग
रुरुंचण्डक्रोधमुन्मत्तभैरवम् कपालिनंभीष
णाख्यंसंहारंचक्रमादमून् त्रिकोणेकालरुद्रं
चदण्डाग्रमेचनादकम् षट्कोणेषुषडंगानि
क्रमादभ्यर्चयेत्सुधीः पूर्वादीशानपर्यन्तेनद
ह्निःपूजयेदिमान् डाकिनीपुत्रकान्पूर्वेराकिणी

प॰ पुत्रकान्पुनः लाकिनीपुत्रकान्यस्मात्काकिनीपुत्र
व॰ कोत्तमः शाकिनीपुत्रकान्भूयो हाकिनीपुत्रकान्पु
४ नः मालिनीपुत्रकान्यश्च देवीपुत्रानतः परम्
श्रद्धयो मारुद्रमातृगणपुत्रान्दक्षिणतो यजेत् ऊ
र्ध्वमुख्याः स्वजातान्पूर्वमथो मुख्याः स्वजातनयः इतिस
म्पूजयेत्क्षेत्रीपुत्रवर्गांस्त्रयोदश तद्बहिः पञ्चप

त्रेषु लोकेषु वटुकान्यजेत् ब्राह्मणीपुत्रकं पूर्वे
माहेश्वरीपुत्रमैश्वरे वैष्णवीपुत्रकं सौम्ये कौमा
रीपुत्रमानले इन्द्राणीपुत्रकं भूयः पश्चिमे पूज
येत्ततः महालक्ष्मीसुतं पश्चाद्दक्षोदिशि समा
र्चयेत् वाराहीपुत्रं वायव्ये चामुण्डासुतमानि
ले वटुकान्दशादिक्ष्वैवं चैन्द्रहे हकं त्रिपुरान्तकम्

प. वेतालं क्तिजिह्वाख्यं कालान्ताख्यं करालकम् प
व. कपादं भीमरूपमचलं हाटकेश्वरम् दिग्विदिक्ष्व
५ न्तरालेषु श्रीकण्ठादीन्यजेत्ततः क्रोधीश्वरादिष्टव
5 न्तांस्तद्बाह्ये समर्चयेत् ततश्चीलक्कलीशाद्यान्द
श्रिरोपूजयेत्सुधीः दिव्यानदिव्यम् सिद्धान्योगीशा
शक्तिसंयुक्तान् योगिनीभिः सदाभ्यर्चेद्दीशाग्निनि

न्वतिस्थितान् इतिसंपूजयेद्देवं वटुकं प्रोक्तवर्त्म
ना धर्मार्थकाममोक्षाणां पतिर्भवति मानवः वि
घ्नंदुर्गां समाराध्य बलिं दत्वा विधानतः काम्यानि
साधयेन्मंत्रीयथोक्तां सिद्धिमाप्नुयात् जुहुयात्स
र्पिषा मंत्रीयथोक्तां सिद्धिमाप्नुयात् वपया वजु
हुयाद्दिव्यप्राकलैर्वर्जयेज्जनान् जुहुयात्तु बला

प· व· ६ 6

भावप्रसूनैःकैरवैःसुधीः धनधान्यादिसम्पत्त्यैजु
हुयात्तिलतण्डुलैः बिल्वप्रसूनैर्जुहुयान्महतींवि
द्युतिश्रियम् लवणैर्मधुसंमिश्रैर्वशायेद्वनिताज
नम् दृष्टिकामेन होतव्यं वेतसस्य समिद्वरैः अ
नेन जुहुयान्नित्यं धनधान्यादिसम्पदे वशायजु
हुयान्मन्त्री मधुनादिवसत्रयम् रोगोक्तौबधहो

मेनरोगानशयन्तितत्क्षणात् कम्पाड्डोहेग्रहड्डो
हेभूतापस्मारसम्भवे व्याघ्राजिनेसमासीनोजु
हुयादयुतंतिलैः भूतादयःपलायन्तेनेक्षन्ते
तांदिशंभयात् कम्पाष्टमीसमारभ्ययावत्साप्त
म्यन्तर्दशी तिलैस्तण्डुलसम्मिश्रैर्मधुरत्रयलो
लितैः त्रिसहस्रंप्रतिदिनंजुहुयात्संस्कृतेनले

प. वटुकेश्वरमभ्यर्च्यंभक्ष्यभोज्यफलान्वितम् नित्यंनि
व. वेद्यंमध्यरात्रेबलिंहरेत् एवंजपित्वाप्रयतःसह
७ स्राण्येकविंशतिम् समाप्तादिवसेरात्रावजंहत्वा
7 बलिंहरेत् ततःकारयन्ताराजानेघयेत्साधकंयत्नैः
विधिनानेनसन्तुष्टोवटुकेशःप्रयच्छति ततोब
लंयशःपुत्रान्कीर्तिंलक्ष्मींमनोगताम् नष्टपत्निश

त्रवः सर्वैवर्धन्ते मित्रबान्धवाः ग्रवग्रहोनजाये
तविषयेतस्यभूपतेः ज्ञङ्घाकेवलेलैलेःयुतं
त्तम्भनेच्छया निगडादिविमोक्षायप्रयोगोयमुदा
हृतः वचाचूर्णपलंजमंचव्येनाज्येनलोलितम्
विभज्यभक्षयेद्रुन्ध्यामण्डलंपुत्रकांक्षिणी विनी
तंपुत्रमाप्नोतिमेधारोग्यबलान्वितम् आदौवन्ते

प्र० व० प 8

प्रयोगस्य वटुकाय बलिं हरेत् द्विविधो बलिराख्या
तो राजसः सात्विको बुधैः राजसो मांसरक्ताद्यैः फल
त्रयसमन्वितः शुक्लपायससंयुक्तो मधुरत्रयलो
लिनः सात्विको मांसरहितः शेषमन्यत्पुरोक्तवत्
ब्राह्मणो नियतः शुद्धः सात्विकं बलिमाऽऽहरेत् सा
धयेन्मनुनाऽनेन भस्मसर्वार्थसिद्धिदम् उशीरं

चन्दनंकुष्ठंघनसारंसकुंकुमम् श्वेतार्कम्मूलंवारा
हीलक्ष्मीक्षीरमहीरुहाम् त्वचोबिल्वतरोम्मूलं
शोषयित्वाशुचूर्णयेत् चूर्णयोग्निरहीतेनगोम
येनविमिश्रितम् कृत्वापिण्डानिसंशोष्यसंस्कृते
हव्यवाहने मूलेनदग्ध्वातद्भस्मशुद्धेपात्रेविनि
क्षिपेत् केतकीमालतीपुष्पैःसाधयेद्भस्मशोधित

प॰ स्व॰ ५ ७

स्तु श्रयुतप्रजपेन्मन्त्रं स्तुत्वाभक्त्याप्रपूजितम् एतदा
स्यादिनप्रातःप्रातःपुण्ड्रंकरोतियः तस्यरोगाःप्र
णश्यन्तिकृत्यादोषादयोग्रहाः रिपुचौरमृगादि
भोभयंतस्यनजायते वर्धन्तेसम्पदःसर्वाःपूज्य
तेसकलैर्जनैः राजावश्योभवेत्तस्यसामात्यःस
परिच्छिदः अभिषेकंप्रकुर्वीतराज्ञोविजयकांक्षि

णः पूर्वोक्ते मण्डपे स्थण्डिले वितानध्वजशोभिते स
र्वतोभद्रमालिख्य कर्णिकां तस्य पूरयेत् सहस्रद्रो
णप्रमाणेन शालिभिः शोधितैः शुभैः तदर्धैस्तण्डु
लैस्तस्मिन्व्यस्य हर्वीकृतान्वितान् हेमादिनिर्मि
तं कुम्भं नवरत्नसमन्वितम् संस्थाप्य विमलै
स्तोयैरापूर्य तस्मिन्विनिक्षिपेत् क्षीरद्रुमप्रवाला

प॰ निलक्ष्मी हृच्चांसहां पुनः कर्पूरं चन्दनं बिल्वमुष्णी
व॰ रं कुंकुमं पुनः कक्कोलमगुरुं जातिमल्लिकां चम्प
१॰ कोत्पलैः गोमेदं दाडिमं पश्चात्पद्मयुग्मेन वेष्ट
10 येत् तस्मिन्नावाह्य वटुकं राजसं सं प्रपूजयेत्
बहिरष्टसुकुम्भेषु भैरवानष्टपूजयेत् त्रयोद
शासुकुम्भेषु त्रयोदशगणान्मसेत् बाह्ये दश